A.C. Joshi Library
P.U. Chandigarh

MSS No. 186 Subject Religion

Name of MSS वैदोक्तिशिवाचनम् Sivārcanapaddhati

Author –

Period – – Folios 9

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios – –

वेताल किरणावली पद्धति

[illegible]

186

(32)

186

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ ॐस्वस्तिश्रीगणेशायनमः अथवेदोक्तशिवार्चनपद्धतिः ॥ तत्रप्रथममा
त्मविन्यासः ॐयातेरुद्रशिवातनूरघोरापापकाशिनीतयानस्तन्वाशन्तम
शि० यागिरिशन्ताभिचाकशीहि १ इतिशिखायाम् असंख्यातासहस्राणियेरुद्राअधिभूम्यां तेषांसहस्रयोजनेवधन्वानितन्मसि २ इतिशिरसि ॥ अस
ङ्ख्यातासहस्राणियेरुद्राअधिभूम्यां तेषांसहस्रयोजनेवधन्वानि
तन्मसि ३ इतिललाटे वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः प्रजाव २
न्तःसचेमहि ४ इतिभ्रुवोर्मध्ये त्र्यम्बकंयजामहेसुगंधिम्पुष्टिवर्द्धनं
उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ५ इतिनेत्रयोः अग्नि।
र्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा अग्निर्वर्च्चोज्योतिर्वर्च्चः
ति

स्वाहा सूर्य्यो वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ६ इति ततीयेने
त्रे नमः स्त्रुत्याय च पथ्याय च नमः काट्याय च नीप्या च नमः कुल्याय च सरस्याय
च नमो नादेयाय च वैशन्ताय च ८ इति कर्णयोः मा नस्तोके तनये मा नऽआयुषि।
मा नो गोषु मा नोऽअश्वेषु रीरिषः मा नो वीरान्रुद्र भामितो वधीर्हविष्मन्तः सदमित्वा
हवामहे ८ इति नासिकयोः अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे निशीर्य्य शल्यानां
मुखा शिवो नः सुमना भव ९ इति मुखे नमो वंचते परिवंचते स्तायूनां पतये नमो नमो
निषंगिणऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां
पतये नमो नमोऽसिमद्भ्यो नक्तंचरद्भ्यो विकृन्तानां पतये नमो नमः इति ग्रीवायां १०।
नीलग्रीवाः शितिकण्ठा दिवꣳरुद्राऽउपश्रिताः तेषाꣳसहस्रयोजनेऽवधन्वानि तन्मसि

रो०

२ इतिकण्ठदेशे नमस्तआयुधायानाततायधृष्णवे उभाभ्यामुततेनमोबाहुभ्यांतव
धन्वने १२ इतिबाह्वोः येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः तेषांसहस्रयोजने
वधन्वानितन्मसि १३ इतिहस्तयोः नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचाप
रजायच नमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायच १४ अंगुलि
षु नमः पर्णायचपर्णशदायचनमउद्गुरमाणायचाभिघ्नतेचनमआखिदतेच
प्रखिदतेचनमइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः किरिकेभ्योदेवानांहृदये
भ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमआनिर्हतेभ्यः १५ इतिहृदये नमो
गणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृ
त्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः १६ इतिपृष्ठे ॥ विकिरिद्र २

विलोहितनमस्तेऽअस्तुभगवः यास्तेसहस्रꣳहेतयोऽन्यमस्मिन्निवपन्तुताः १७ इतिउदरे
नमः शम्भवायचमयोभवायचनमः शङ्करायचमयस्करायचनमः शिवायचशिव
तरायच १८ इतिदक्षिणकुक्षौ द्रापेअन्धसस्पतेदरिद्रनीललोहित आसाम्प्रजाना
मेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः किञ्चनाममत् १९ इतिवामकुक्षौ हिरण्यगर्भः
समवर्त्तताग्रेभूतस्यजातः पतिरेकआसीत् सदाधारपृथिवीन्द्यामुतेमांकस्मैदेवा
ह यहविषाविधेम २० इतिनाभौ मीढुष्टमशिवतमशिवोनः सुमनाभवपरमेवृक्षः।
आयुधन्निधायकृत्तिंवसानः आचरपिनाकम्बिभ्रदागहि २१ इतिकट्याम् शिवोना
मासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः निवर्त्तयाम्यायुषेन्नाद्यायप्रजन
नायरायस्पोषायसुप्रजास्त्वायसुवीर्य्याय २२ इतिलिङ्गे इमारुद्रायतवसे
कपर्दिनेक्षयद्वीरायप्रभरामहेमती यथाशमसद्द्विपदेचतुष्पदेविश्वंपुष्टं
३

शि० ग्रामेऽस्मिन्ननातुरम् २३ इतिगुह्ये इषेत्वोर्ज्जेत्वावायवस्थदेवोवः सविताप्र
३ र्प्पयतुश्रेष्ठतमायकर्म्मणे आप्यायध्वमघ्न्याः इन्द्रायभागंप्रजावतीरनमीवा
अयक्ष्मामावस्तेनः ईशतमाघशंसोध्रुवाः अस्मिन्गोपतौस्यातबह्वीर्यजमान
स्यपशून्पाहि २४ इतिवृषणयोः मानोमहान्तमुतमानोः अर्भकम्मानउक्षन्तमु
तमानः उक्षितम् मानोवधीः पितरम्मोतमातरम्मानः प्रियस्तन्वोरुद्ररीरिषः २५
इतिऊर्व्वोः एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागः आखु
स्तेपशुः २६ इतिजानुनोः नमोज्येष्ठायचकनिष्ठायचनमः पूर्वजायचापरजाय
चनमोमध्यमायचापगल्भायचनमोजघन्यायचबुध्न्यायच २७ इतिजंघयोः
नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचनमो प०
ग्र्यायचप्रथमायच २८ इतिगुल्फयोः येपथाम्पथिरक्षयः ऐलवृदाआयु ३

द्धधः तेषाᳪंसहस्रयोजनेवधन्वानितन्मसि २९ इतिपादयोः ॐ प्रथमोवोचदधिवक्ता प्रथमोदैव्योभिषक् ॐ ह्रीं अस्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीपरासुव ३०। इतिकवचम् नमोविल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः श्रुतायच श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायच ३१ इत्यस्त्रम् विज्यन्धनुः कपर्द्दिनो विशल्योवाणवाँ २ उत ॐ अनेशन्नस्ययाइषवः ॐ आभुरस्यनिषङ्गधिः ३२ धनुः यत्र वाणाः सम्पतन्तिकुमाराविशिखाइव तन्नः इन्द्रोवृहस्पतिरदितिः शर्म्मयच्छतु ३३ वाणः विकिरिद्रविलोहितनमस्तेॐ अस्तुभगवः यास्तेसहस्रᳪं हेतयोन्यमस्म न्निवपन्तुताः ३४ खड्गः यएतावन्तश्चभूयाᳪंसश्चदिशोरुद्रावितस्थिरे तेषाᳪंस हस्रयोजनेवधन्वानितन्मसि ३५ इतिदिग्बंधनं एवंन्यासविधिंकृत्वाशिवोहमिति भावयेत् एवंशिवलिंगेपिन्यासविधिंकुर्यात् मानोमहान्तमुतमानोॐ अर्भकम्मा

शि० नःउतत्वमतमानउक्षितं मानोवधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरि
४ षः ३६ इत्यावाहनम् यातेरुद्रशिवातनूरघोरापापकाशिनी तयानस्तन्वाशन्त
मयागिरिशन्ताभिचाकशीहि ३७ पुष्पासनम् यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे शि
शिवाङ्गिरित्रतांकुरुमाहिंसीःपुरुषंजगत् ३८ पाद्यं॥ शिवेनवचसात्वागिरिशा
च्छावदामसि यथानःसर्वमिज्जगदयक्ष्मंसुमनाअसत् ३९ एषोऽर्घः अध्यवोचद
५ +धिवक्ताप्रथमोदैव्योभिषक् अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीः
परासुव ४० रुद्रमाचमनीयम् असौयस्ताम्रोअरुणःउतबभ्रुःसुमंगलः ये
चैनंरुद्राःअभितोदिक्षुश्रिताःसहस्रशोवैषांहेडईमहे ४१ इदंस्नानीयम्॥
अथपंचामृतस्नानम् ॐआप्यायस्वेतिगोतमऋषिःसोमोदेवतागायत्रीछन्दःक्षीर १०
स्नानेविनियोगः ॐआप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् भवावाजस्यसंगथे ४

॥ ॐपयः पृथिव्यांपयः ओषधीषुपयोदिव्यन्तरिक्षेपयोधः पयस्वतीः प्रदिशः सन्नमसं
इतिपयःस्नानं ॥ असौयस्ताम्रो ॥ अरुण ॥ उतबभ्रुः समंङ्गलः येचैनꣳरुद्रा ॥ अभितोदि
क्षुश्रिताः सहस्रशोवैषाꣳहेड ॥ ईमहे देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो
हस्ताभ्याम् शुद्धस्नानं दधिक्राव्णइत्यस्यदधिक्राव्णऋषिः सुरभिर्देवतानुष्टुप्छंदो
दधिस्नानेविनियोगः ॐदधिक्राव्णो ॥ अकारिषंजिष्णोरश्वस्यवाजिनः सुरभिनोमुखा
करत्प्रण ॥ आयूꣳषितारिषत् इतिदधिस्नानं शुद्धस्नानं ॐ शुक्रमसीत्यस्यय
नुषः प्रजापतिर्ऋषिः आज्यंदेवतानुष्टुप्छंदः आज्यस्नानेविनियोगः ॐशुक्रमसिज्यो
तिरसितेजोसिघृतवतीभुवनानामभिश्रियो द्यावीपृथ्वीमधुदुघेसुपेशसा ॥ ४७ ॐ
घृतंघृतपावानःपिबतवसांवसापावानःपिबतांतरिक्षस्यहविरसिस्वाहा ४८॥
घृतस्नानं शुद्धस्नानं ॐमधुवाताइतिमंत्रस्यगोतमऋषिर्मधुदेवतागायत्री
द्यावापृथिवीवरुणस्यधर्मणाविष्कभितेअजरेभूरिरेतसा २

शि० छंदो मधुस्नाने विनियोगः ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः संत्वोष
धीः ४९ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः मधुद्यौरस्तु नः पिता ५० मधु।
५ मान्नो वनस्पतिर्मधुमाँ२॥ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः ५१ इति मधुस्नानं
शुद्धस्नानं ॥ स्वादुः पवस्वेति मंत्रस्य वेणु ऋषिः सोमात्मिका शर्करा देवता जग
तीछंदः शर्करास्नाने विनियोगः ॐ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिंद्राय सु
हवीतु नाम्ने स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ२॥ अदाभ्यः अ।
पाꣳरसस्य यो रसस्तम्वो गृह्णाम्युत्तमम् ५३ शर्करास्नानं शुद्धस्नानं अध्यवो
चदधिवक्ता प्रथमो दैव्यो भिषक् अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधरा
चीः परासुव ५ आचमनीयं असौ यो वसर्पति नीलग्रीवो विलोहितः उतैनं गोपा प०
अदृश्रन्नदृश्रन्नुदहार्यः अदृष्टो मृडयाति नः वस्त्रं ॐ यद्धिधास्ये यशोधास्ये दी ५
अपांꣳरसमुद्वयसꣳ सूर्ये संतꣳ समाहितं ५

दीर्घायुत्वायजरदष्टिरस्मि शतंचजीवामिशरदः पुरूचीरायस्पोषमभिसंव्ययि
ष्ये वस्त्राणांकर्षिबंधनम् ॐयज्ञोपवीतमिति परमेष्ठीऋषिर्लिंगोक्तादेवता त्रि
ष्टुप्छंदः उपवीतपरिधानेविनियोगः १नमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे
अथोयेअस्यसत्वानोहंतेभ्योकरन्नमः उपवीतं यज्ञोपवीतंपरमंपवित्रंप्रजापते
र्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः १प्रमुंच
धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् याश्चतेहस्तइषवः परताभगवोवप गंधौहैवास्यसग
धितेजनंतपसागम्मितेजनंभववि गंधेनैवैनमेतत्समर्धयति ५२ इतिगंधः अक्षतन्नमी
मदन्तह्यवप्रियाअधूषत अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विंद्रते
हरी ६० इमेअक्षताः विज्यंधनुः कपर्दिनोविशल्योवाणवाँ ३॥ उत अस्येशन्नस्यया
इषवः आभुरस्यनिषङ्गधिः ६१ याफलिनीर्याअफलाअपुष्पायाश्चपुष्पिणीः॥

बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसः ॥६२ पुष्पाणि नमोबिल्मिनेचकवचिनेचनमो
शि०पू० वर्म्मिणेचवरूथिनेचनमः श्रुतायचश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायच
६ ६३ अमृतोद्भवंश्रीवृक्षंशंकरस्यसदाप्रियम् तत्तेशंभोप्रयच्छामिबिल्वपत्रंसुरे
श्वर बिल्वपत्राणि गृहाणबिल्वपत्राणिसपुष्पाणिमहेश्वर सुगंधीनिनवानी
शशिवत्त्वंकुसमप्रिय ६४ यातेहेतिर्मीढुष्टमहस्तेबभूवतेधनुः तयास्मान्विश्व
तस्त्वमयक्ष्मयापरिभुज ६५ ॐधूरसिधूर्व धूर्वन्तंधूर्वतंयोऽस्मान्धूर्वतितंधू
र्वयंवयंधूर्वामः देवानामसिवह्नितमंसस्नितमंजुष्टतमंदेवहूतमम् ६६ धूप
पः परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतः अथोयइषुधिस्तवारेअस्मन्निधेहि
तम् ६७ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहा सूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा अग्निर्वर्च्चो
ज्योतिर्वर्च्चःस्वाहा सूर्य्योवर्च्चोज्योतिर्वर्च्चः स्वाहाज्योतिःसूर्य्यः सूर्य्योज्योतिःस्वाहा ६

इमं दीपं प्रदर्शयामि ॥ अवतत्य धनुष्ट्वं सहस्राक्ष शतेषुधे निशीर्य शल्यानां मुखा
शिवो नः सुमना भव ॥ ७९ ॥ अन्नपते न्नस्य नो देह्यनमीवस्य शुष्मिणः प्र प्रदातारन्तारि
ष ऊर्जन्नो धेहि द्विपदे चतुष्पदे ८० इदं नैवेद्यं नैवेद्यान्ते जलं शिवाय नमः नम
स्त आयुधायानातताय धृष्णवे उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ८१ उरव
वासः नमः पर्णाय च पर्णशदाय च नमः उद्गुरमाणाय चाभिघ्नते च नमः आखिदते
च प्रखिदते च नमः इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानां हृ
दयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमः आनिर्हतेभ्यः ८२ इदं ताम्बू
लम् हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् स दाधार पृ
थिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ८३ एष दक्षिणा ॥ अथ ध्यानं ॐ शु
द्धस्फटिकसंकाशं त्रिनेत्रं चवक्त्रकम् गंगाधरं दशभुजं सर्वाभरणभूषितम् ॥

शि० नीलग्रीवं शशांकांकं नागयज्ञोपवीतिनम् ॥ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं
कमंडल्वक्षसूत्राभ्यामन्वितं शूलपाणिनम् ज्वलत्पिंगलजटाशिखामुद्योतका
रिणं अमृतेनाप्लुतं हृष्टमुमादेहार्द्धधारिणम् दिव्यसिंहासनासीनं दिव्यभोगस
मन्वितं दिग्देवतासमायुक्तं सुरासुरनमस्कृतं नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरम
व्ययम् सर्वव्यापिनमीशानं रुद्रं वै विश्वरूपिणं एवं ध्यात्वा द्विजः सम्यक् ततो
यजनमारभेत् तद्यथा शुद्धोदकेन तर्प्पयेत् भवं देवं तर्प्पयामि १ शर्वं देवं
तर्प्पयामि २ ईशानं देवं तर्प्पयामि ३ पशुपतिं देवं तर्प्पयामि ४ रुद्रं देवं
तर्प्पयामि ५ उग्रं देवं तर्प्पयामि ६ भीमं देवं तर्प्पयामि ७ महांतं देवं १०
तर्प्पयामि ८ देवदेवं तर्प्पयामि ९ ॐ ज्येष्ठाय नमः पुनराचमनीयं ॐ
श्रेष्ठाय नमः मधुपर्क्कः मधुपर्क्कं गृहाणेश सर्वदा मधुपर्क्कीय मधुपर्क्कं

प्रदानेनप्रीतोभवमहेश्वर ॐकालायनमः गंधः ॐकलविकरणायनमः पुष्पं ॥
सर्वभूतदमनायनमः धूपः मनोन्मनायनमः दीपः भवोद्भवायनमः कालनै
२१प्रैशैवेद्यं अथपुष्पांजलिः ॐभवायदेवायनमः ॐशर्वायदेवायनमः २ ॐईशा
नायदेवायनमः ३ ॐपशुपतयेदेवायनमः ४ ॐरुद्रायदेवायनमः ॐउग्रा
यदेवायनमः ६ ॐभीमायदेवायनमः ७ महतोदेवायनमः ८ भवस्यदेव
स्यपत्न्यैनमः शर्वस्यदेवस्यपत्न्यैनमः २ ईशानस्यदेवस्यपत्न्यैनमः ३
पशुपतेदेवस्यपत्न्यैनमः रुद्रस्यदेवस्यपत्न्यैनमः ५ उग्रस्यदेवस्यपत्न्यैनमः
भीमस्यदेवस्यपत्न्यैनमः महतोदेवस्यपत्न्यैनमः ८ ॐअघोरेभ्योथघोरेभ्यो
घोरघोरतरेभ्यः सर्वेभ्यः सर्वसर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॐतत्पुरुषाय
विद्महेमहादेवायधीमहि तन्नोरुद्रःप्रचोदयात् ततः शर्वायक्षितिमूर्तयेनमः १

शि० मवायजलमूर्त्तयेनमः २ रुद्रायअग्निमूर्त्तयेनमः ३ उग्रायवायमूर्त्तयेनमः
भीमायआकाशमूर्त्तयेनमः ५ पशुपतयेयजमानमूर्त्तयेनमः ६ महादेवा
८ यसोममूर्त्तयेनमः ७ ईशानायसूर्यमूर्त्तयेनमः ८ एवंसंपूज्य हिरण्यग
र्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमां
कस्मैदेवायहविषाविधेम १ आमात्रिपार्थिवंरजः पितरप्राप्रिधामभिः
दिवः सदांसिवृहतीवितिष्ठसः आत्वेषंवर्त्ततेतमः इतिआरात्रिकं मा
नोमहान्तमुतमानोअर्भकम्मानः उक्षन्तमुतमानः उक्षितम् मानोवृ
धीः पितरंमोतमातरम्मानः प्रियास्तन्वोरुद्ररीरिषः इतिप्रदक्षिणा ततःस
हस्रघटैःस्नापनम् ॐभगवन्महादेवक्षमस्वेतिविसर्जनम् मानस्तोकेत १०
नयेमानः आयुषिमानोगोषुमानोअश्वेषुरीरिषः मानोवीरान्रुद्रभामितो ८

बुधीहैविष्मन्तः सदमित्वाहवामहे इतिविसर्जनंमम् ॥ अस्यश्रीषडक्षरशिवमं
त्रस्यवामदेवऋषिः पंक्तिछंदः सदाशिवोदेवताचतुर्वर्गचतुष्टयसिध्यर्थेज
जपेविनियोगः वामदेवाऋषयेनमः शिरसि पंक्तिछंदसेनमोमुखे सदाशि
वदेवतायैनमोहृदयेचतुर्विधपुरुषार्थसिध्यर्थेजपेविनियोगः इतिकृतांजलि
र्वदेत् ॐहृदयायनमः नशिरसेस्वाहा मःशिखायैवषट् शिवचाङ्गं वानेत्रत्र
यायैवषट् गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपम् सिद्धिर्भवतुमेदेवत्वत्प्रसा
दान्महेश्वर। जपांतेजपंसमर्प्यस्तोत्रंपठेत् ॐकारंबिंदुसंयुक्तंनित्यंध्याय
तियोगिनः कामदंमोक्षदंचैवॐकारंतंनमाम्यहं १ नजातिर्नमृतिर्यस्यात्वयो
यस्यनविद्यते नमंतिदेवताःसर्वेनकारंतंनमाम्यहं २ महादेवंमहावक्त्रं
महाध्यानपरायणं महापापहरंदेवंमकारंतंनमाम्यहं ३ शिवास्यरतरोना
स्तिशिवशास्त्रेषुनिश्चयः शमंतिसर्वपापानिशिकारंतंनमाम्यहं ४ वाहनंवृष

भोयस्यवासुकिकंठभूषतं वामेशक्तिधरंदेवंवकारंतंनमाम्यहं ५ यत्रप
शि० त्रस्थितोदेवःसर्वव्यापीमहेश्वरःयोगुरुःसर्वदेवानांयकारंतंनमाम्यहं ६ इ
२ दंषडक्षरस्तोत्रंप्रातरुत्थाययःपठेत् मुच्यतेसर्वपापेभ्योशिवलोकंसग
च्छति इतिषडक्षरस्तोत्रम् प्रदक्षिणेते अंगहीनंक्रियाहीनंविधिहीनंम पु०
हेश्वर। पूजितोसिमयादेवतत्क्षमस्वममाकृतं मंत्रेणाक्षरहीनेनपुष्पेनवि ८
कलेनवातामसेनचभावेनतत्क्षमस्वममप्रभो कृतंसंपूर्णतांयातुफलं
दृ चाक्षयमस्तुते इतिवेदोक्तिशिवार्चनम्शुभम् ॥ संवत्सर१९